# Mrityulangula Upanishad

# મૃત્યુલાઙ્ગૂલોપનિષત્

## Document Information

Text title : mRRityulAngUlopaniShat

File name : mRRityulAngUlopaniShat.itx

Category : upanishhat, shiva, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : May 13, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# મૃત્યુલાઙ્ગૂલોપનિષત્

અથ મૃત્યુલાઙ્ગૂલં વ્યાખ્યાસ્યામઃ । અસ્ય મૃત્યુલાઙ્ગૂલમન્ત્રસ્ય
વસિષ્ઠ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । કાલાગ્નિરુદ્રો યમશ્ચ દેવતા ।
મૃત્યૂપસ્થાને વિનિયોગઃ । અથાતો યોગજિહ્વઃ સાધુમતિયોજિતં સ મે
વાહ કાલં પુરુષમૂર્ધ્વલિઙ્ગં વિરૂપાક્ષં વિશ્વરૂપાય નમો નમઃ ।
પશુપતયે નમઃ । ય ઇદં શ‍ૃણુયાન્નિત્યં મૃત્યુલાઙ્ગલં ત્રિસન્ધ્યં
કીર્તયતિ વા સ બ્રહ્મહત્યાં વ્યપોહતિ । સુવર્ણસ્તેય્યસ્તેયી ભવતિ ।
ગુરુદારાભિગામ્યગામી ભવતિ । સર્વેભ્યઃ પાતકેભ્ય ઉપપાતકેભ્યશ્ચ
સદ્યો વિમુક્તો ભવતિ । સકૃજ્જપ્તેનાનેન ગાયત્ર્યાઃ ષષ્ટિસહસ્રાણિ
ફલિતાનિ ભવન્તિ । અષ્ટૌ બ્રાહ્મણાન્ ગ્રાહયિત્વા બ્રહ્મલોકમવાપ્નોતિ ।
યઃ કશ્ચિન્ન દદાતિ સ શ્વિત્રી કુષ્ઠી કુનખી વા ભવેત્ । યઃ
કશ્ચિદ્દીયમાનં ન ગૃહ્ણાતિ સોઽન્ધો બધિરો મૂકો વા ભવતિ ।
મૃત્યુમુપસ્થિતઃ ષણ્માસાદર્વાક્ । બન્ધોઽયં નશ્યતિ ઇત્યનેન
મૃત્યુલાઙ્ગૂલાખ્યસ્ય ચ મહામન્ત્રસ્ય શતકૃત્વો જપ્તેન ભગવાન્
ધર્મરાટ્ મમ પ્રીયતામ્ ॥

ઋતં નષ્ટં યદા કાલે ષણ્માસેન મરિષ્યતિ ।
ઋતં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ॥

ઊર્ધ્વલિઙ્ગં વિરૂપાક્ષં વિશ્વરૂપં નમામ્યહમ્ ।
સત્યં તુ પઞ્ચમે માસે પરં બ્રહ્મ ચતુર્થકે ॥

પુરુષં ચ તૃતીયે વા દ્વિતીયે કૃષ્ણપિઙ્ગલમ્ ॥

ઊર્ધ્વલિઙ્ગં તુ માસેન વિરૂપાક્ષં તદર્ધકે ।
વિશ્વરૂપં તૃતીયેઽહ્નિ સદ્યશ્ચૈવ નમો નમઃ ॥

(શૈવ-ઉપનિષદઃ)

ઇતિ મૃત્યુલાઙ્ગૂલોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Mrityulangula Upanishad*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*